श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ प्रक्षिप्तेषु द्वितीयः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ प्रक्षिप्तेषु द्वितीयः सर्गः ॥

## श्वानं प्रति श्रीरामस्य न्यायस्तदिच्छया तत्ताडकस्य ब्राह्मणस्य मठाधीशपदे प्रतिष्ठापनं शुना मठाधीशत्वदोषाणां प्रतिपादनम्

श्रुत्वा रामस्य वचनं लक्ष्मणस्त्वरितस्तदा।
श्वानमाहूय मतिमान् राघवाय न्यवेदयत्॥ 1 ॥

दृष्ट्वा समागतं श्वानं रामो वचनमब्रवीत्।
विवक्षितार्थं मे ब्रूहि सारमेय न ते भयम्॥ 2 ॥

अथापश्यत तत्रस्थं रामं श्वा भिन्नमस्तकः।
ततो दृष्ट्वा स राजानं सारमेयोऽब्रवीद् वचः॥ 3 ॥

राजैव कर्ता भूतानां राजा चैव विनायकः।
राजा सुप्तेषु जागर्ति राजा पालयति प्रजाः॥ 4 ॥

नीत्या सुनीतया राजा धर्मं रक्षति रक्षिता।
यदा न पालयेद् राजा क्षिप्रं नश्यन्ति वै प्रजाः॥ 5 ॥

राजा कर्ता च गोप्ता च सर्वस्य जगतः पिता।
राजा कालो युगं चैव राजा सर्वमिदं जगत्॥ 6 ॥

धारणाद् धर्ममित्याहुर्धर्मेण विधृताः प्रजाः।
यस्माद् धारयते सर्वं त्रैलोक्यं सचराचरम्॥ 7 ॥

धारणाद् विद्विषां चैव धर्मेणारञ्जयन् प्रजाः।
तस्माद् धारणमित्युक्तं स धर्म इति निश्चयः॥ **8** ॥

एष राजन् परो धर्मः फलवान् प्रेत्य राघव।
नहि धर्माद् भवेत् किञ्चिद् दुष्प्रापमिति मे मतिः॥ **9** ॥

दानं दया सतां पूजा व्यवहारेषु चार्जवम्।
एष राम परो धर्मो रक्षणात् प्रेत्य चेह च॥ **10** ॥

त्वं प्रमाणं प्रमाणानामसि राघव सुव्रत।
विदितश्चैव ते धर्मः सद्भिराचरितस्तु वै॥ **11** ॥

धर्माणां त्वं परं धाम गुणानां सागरोपमः।
अज्ञानाच्च मया राजन्नुक्तस्त्वं राजसत्तम॥ **12** ॥

प्रसादयामि शिरसा न त्वं क्रोद्धुमिहार्हसि।
शुनः स वचनं श्रुत्वा राघवो वाक्यमब्रवीत्॥ **13** ॥

किं ते कार्यं करोम्यद्य ब्रूहि विस्रब्ध मा चिरम्।
रामस्य वचनं श्रुत्वा सारमेयोऽब्रवीदिदम्॥ **14** ॥

धर्मेण राष्ट्रं विन्देत धर्मेणैवानुपालयेत्।
धर्माच्छरण्यतां याति राजा सर्वभयापहः॥ **15** ॥

इदं विज्ञाय यत् कृत्यं श्रूयतां मम राघव।
भिक्षुः सर्वार्थसिद्धश्च ब्राह्मणावसथे वसन्॥ **16** ॥

तेन दत्तः प्रहारो मे निष्कारणमनागसः।
एतच्छ्रुत्वा तु रामेण द्वाःस्थः सम्प्रेषितस्तदा॥ **17** ॥

आनीतश्च द्विजस्तेन सर्वसिद्धार्थकोविदः।
अथ द्विजवरस्तत्र रामं दृष्ट्वा महाद्युतिः॥ **18** ॥

किं ते कार्यं मया राम तद् ब्रूहि त्वं ममानघ।
एवमुक्तस्तु विप्रेण रामो वचनमब्रवीत्॥ **19** ॥

त्वया दत्तः प्रहारोऽयं सारमेयस्य वै द्विज।
किं तवापकृतं विप्र दण्डेनाभिहतो यतः॥ **20** ॥

क्रोधः प्राणहरः शत्रुः क्रोधो मित्रमुखो रिपुः।
क्रोधो ह्यसिर्महातीक्ष्णः सर्वं क्रोधोऽपकर्षति॥ **21** ॥

तपते यजते चैव यच्च दानं प्रयच्छति।
क्रोधेन सर्वं हरति तस्मात् क्रोधं विसर्जयेत्॥ **22** ॥

इन्द्रियाणां प्रदुष्टानां हयानामिव धावताम्।
कुर्वीत धृत्या सारथ्यं संहृत्येन्द्रियगोचरम्॥ **23** ॥

मनसा कर्मणा वाचा चक्षुषा च समाचरेत्।
श्रेयो लोकस्य चरतो न द्वेष्टि न च लिप्यते॥ **24** ॥

न तत् कुर्यादसिस्तीक्ष्णः सर्पो वा व्याहतः पदा।
अरिर्वा नित्यसङ्क्रुद्धो यथाऽऽत्मा दुरनुष्ठितः॥ **25** ॥

विनीतविनयस्यापि प्रकृतिर्न विधीयते।
प्रकृतिं गूहमानस्य निश्चयेन कृतिर्ध्रुवा॥ **26** ॥

एवमुक्तः स विप्रो वै रामेणाक्लिष्टकर्मणा।
द्विजः सर्वार्थसिद्धस्तु अब्रवीद् रामसन्निधौ॥ **27** ॥

मया दत्तप्रहारोऽयं क्रोधेनाविष्टचेतसा।
भिक्षार्थमटमानेन काले विगतभैक्षके॥ **28** ॥

रथ्यास्थितस्त्वयं श्वा वै गच्छ गच्छेति भाषितः।
अथ स्वैरेण गच्छंस्तु रथ्यान्ते विषमं स्थितः॥ **29** ॥

क्रोधेन क्षुधयाविष्टस्ततो दत्तोऽस्य राघव।
प्रहारो राजराजेन्द्र शाधि मामपराधिनम्॥ **30** ॥

त्वया शस्तस्य राजेन्द्र नास्ति मे नरकाद्भयम्।
अथ रामेण सम्पृष्टाः सर्व एव सभासदः॥ **31** ॥

किं कार्यमस्य वै ब्रूत दण्डो वै कोऽस्य पात्यताम्।
सम्यक्प्रणिहिते दण्डे प्रजा भवति रक्षिता॥ **32** ॥

भृग्वाङ्गिरसकुत्साद्या वसिष्ठश्च सकाश्यपः।
धर्मपाठकमुख्याश्च सचिवा नैगमास्तथा॥ **33** ॥

एते चान्ये च बहवः पण्डितास्तत्र सङ्गताः।
अवध्यो ब्राह्मणो दण्डैरिति शास्त्रविदो विदुः॥ **34** ॥

ब्रुवते राघवं सर्वे राजधर्मेषु निष्ठिताः।
अथ ते मुनयः सर्वे राममेवाब्रुवंस्तदा॥ **35** ॥

राजा शास्ता हि सर्वस्य त्वं विशेषेण राघव।
त्रैलोक्यस्य भवाशास्ता देवो विष्णुः सनातनः॥ **36** ॥

एवमुक्ते तु तैः सर्वैः श्वा वै वचनमब्रवीत्।
यदि तुष्टोऽसि मे राम यदि देयो वरो मम॥ **37** ॥

प्रतिज्ञातं त्वया वीर किं करोमीति विश्रुतम्।
प्रयच्छ ब्राह्मणस्यास्य कौलपत्यं नराधिप॥ **38** ॥

कालञ्जरे महाराज कौलपत्यं प्रदीयताम्।
एतच्छ्रुत्वा तु रामेण कौलपत्येऽभिषेचितः॥ **39** ॥

प्रययौ ब्राह्मणो हृष्टो गजस्कन्धेन सोऽर्चितः।
अथ ते रामसचिवाः स्मयमाना वचोऽब्रुवन्॥ **40** ॥

वरोऽयं दत्त एतस्य नायं शापो महाद्युते।
एवमुक्तस्तु सचिवै रामो वचनमब्रवीत्॥ **41**॥

न यूयं गतितत्त्वज्ञाः श्वा वै जानाति कारणम्।
अथ पृष्टस्तु रामेण सारमेयोऽब्रवीदिदम्॥ **42**॥

अहं कुलपतिस्तत्र आसं शिष्टान्नभोजनः।
देवद्विजातिपूजायां दासीदासेषु राघव॥ **43**॥

संविभागी शुभरतिर्देवद्रव्यस्य रक्षिता।
विनीतः शीलसम्पन्नः सर्वसत्त्वहिते रतः॥ **44**॥

सोऽहं प्राप्त इमां घोरामवस्थामधमां गतिम्।
एवं क्रोधान्वितो विप्रस्त्यक्तधर्माहिते रतः॥ **45**॥

क्रुद्धो नृशंसः परुष अविद्वांश्चाप्यधार्मिकः।
कुलानि पातयत्येव सप्त सप्त च राघव॥ **46**॥

तस्मात् सर्वास्ववस्थासु कौलपत्यं न कारयेत्।
यमिच्छेन्नरकं नेतुं सपुत्रपशुबान्धवम्॥ **47**॥

देवेष्वधिष्ठितं कुर्याद् गोषु च ब्राह्मणेषु च।
ब्रह्मस्वं देवताद्रव्यं स्त्रीणां बालधनं च यत्॥ **48**॥

दत्तं हरति यो भूय इष्टैः सह विनश्यति।
ब्राह्मणद्रव्यमादत्ते देवानां चैव राघव॥ **49**॥

सद्यः पतति घोरे वै नरकेऽवीचिसंज्ञके।
मनसापि हि देवस्वं ब्रह्मस्वं च हरेत्तु यः॥ **50**॥

निरयान्निरयं चैव पतत्येव नराधमः।
तच्छ्रुत्वा वचनं रामो विस्मयोत्फुल्ललोचनः॥ **51**॥

**श्वाप्यगच्छन्महातेजा यत एवागतस्ततः।**
**मनस्वी पूर्वजात्या स जातिमात्रोऽपदूषितः।**
**वाराणस्यां महाभागः प्रायं चोपविवेश ह॥ 52॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे प्रक्षिप्तेषु द्वितीयः सर्गः॥